http://www.howtoexam.com

(Pages : 4) **3218**

**Reg. No. : .........................**

**Name : ..............................**

# IV Semester M.A. Examination, June 2009
## SANSKRIT (Special)
## SY 243 : Vyakarana IX (Prior to 2006 Admn.)
## व्युत्पत्तिवाद: – प्रथमा

Time: 3 Hours Max. Marks: 75

*सूचना : देवनागरी लिपिमुपयुज्य संस्कृतभाषया उत्तरयत ।*

I. कोष्ठात् उत्तरमादाय लिखत :

1) अभेदस्तादात्म्यं, तच्चासाधारणो धर्म: । अत्रासाधारण्यं किम् ?

a) द्विनिष्ठत्वम् b) भेदविशिष्टत्वम्

c) एकमात्रवृत्तित्वम् d) स्वप्रतियोगित्वम्

2) शतं ब्राह्मणा इत्यस्य साधुत्वं कथम् ?

a) लिङ्गभेदात् b) लिङ्गसाम्यात्

c) विशेषानुशासनात् d) लक्षणया

3) स च क्वचिदभेद: । क: ?

a) संसर्ग: b) आकाङ्क्षा

c) आधाराधेयभाव: d) व्युत्पत्तिविशेष:

4) क: प्रयोग: विशेषानुशासनात् साधु: ?

a) त्रय: समुदिता हेतु: b) घटो घट:

c) घटा नील: d) शतं ब्राह्मण:

5) अनेकपशुकरणाकयागाददृष्टसिद्धि: कुतो न ?

a) जातावेकत्वात् b) पशुनिष्ठैकत्वस्य विवक्षितत्वात्

c) अन्वयायोग्यत्वात् d) अनाचारात्

6) औत्सर्गिकमेकवचनं कुत्रास्ति ?

a) कर्मख्याते b) कर्त्राख्याते

c) नामविशेषणे d) क्रियाविशेषणे

**P.T.O.**

Placement paper, University exam paper, entrance exam and school question paper

http://www.howtoexam.com



7) भावाख्यातस्थले विभक्तेरर्थ: क: ?
 a) एकत्वम्
 b) अर्थो नास्ति
 c) व्यापार:
 d) फलम्

8) अनादितात्पर्यविषयीभूतार्थनिष्ठा का ?
 a) व्यञ्जना
 b) निरूढलक्षणा
 c) जहल्लक्षण
 d) अजहल्लक्षण

9) चन्द्र इव मुखमित्यत्र निपातार्थ: क: ?
 a) सादृश्यम्
 b) प्रतियोगित्वम्
 c) अनुयोगित्वम्
 d) आधारत्वम्

10) संख्याया: प्रकृत्यर्थे केन सम्बन्धेन विशेषणत्वं भवति ?
 a) पर्याप्त्या
 b) समवायेन
 c) दैशिकसम्बन्धेन
 d) कालिकसंबन्धेन

11) नवीनमते राज्ञ इत्यत्र षष्ठ्यर्थ: क: ?
 a) निरूपितत्वम्
 b) स्वत्वम्
 c) अभेद:
 d) स्वामित्वम्

12) प्रतियोगिता नाम क: सम्बन्ध: ?
 a) स्वरूप सम्बन्ध:
 b) अभेद:
 c) भेद:
 d) अतिरिक्त:

13) अनुयोगिनिष्ठधर्मस्य सम्बन्धत्वमिति केषां मतम् ?
 a) नैयायिकानाम्
 b) वैयाकरणानाम्
 c) मीमांसकानाम्
 d) बौद्धानाम्

14) रक्तो घट इत्यत्र रक्तघटयो: क: सम्बन्ध: ?
 a) अभेद:
 b) स्वरूपसम्बन्ध:
 c) आधाराधेयभाव:
 d) प्रतियोग्यनुयोगिभाव:

15) नीलस्य घट: इत्यत्र अभेदान्वयबोध: कुतो न ?
 a) अयोग्यत्वात्
 b) विरुद्धविभक्तिमत्वात्
 c) वचनैकत्वात्
 d) समानविभक्तिकत्वात्

**(1×15=15 Marks)**

HowToExam.com

Placement paper, University exam paper, entrance exam and school question paper

http://www.howtoexam.com



II. वाक्येन वाक्याभ्यां वा **दशाना**मुत्तरं लिखत ।

1) शक्त्यादीनां तृणारणिमणिन्यायेन हेतुत्वशङ्कानिरास: कस्मात् ?
2) किं नाम स्वसमान विभक्तिकत्वम् ?
3) इदं दधीत्यत्र विशेषणपदानन्तरं विभक्त्यसत्वेऽपि कथं साधुत्वम् ?
4) नीलघटमानयेत्यत्र नीलपदोत्तरविभक्ति: किमर्था ?
5) कर्म गच्छतीति वाक्यस्य निराकाङ्क्षता कस्मात् ?
6) स्तोक: पाक इत्यत्र स्तोकपदाद् द्वितीया कथं न ?
7) घमन्तस्यापि पाकाक्षै शक्ति: किमर्थं कैश्चिदुपगम्यते ?
8) आख्यातस्य आश्रयत्वे निरूढलक्षणा दीधितिकार: किमर्थम् स्वीकरोति ?
9) नीलौ घटौ इत्यत्र द्वित्वं कथा विभक्त्या प्रत्याच्यते ?
10) न कलञ्जं भक्षयेदित्यत्र धात्वर्थस्य भक्षणस्य केन सम्बन्धेन अन्वय: ?
11) दण्डवान् दण्डवान् इत्यत्र अभेदान्वयबोध: कस्मान्नास्ति ?
12) घटो न घट इत्यत्र अभेदान्वयबोध: कस्मान्नास्ति ?
13) पचति चैवा इत्यत्र पाकस्य चैत्रे कथमन्वय: ?
14) दधि पश्यति इत्यत्र लुप्तद्वितीयानुसन्धानस्य आवश्यकत्वं किमर्थम् ?
15) राज्ञ: पुरुष इत्यादौ षष्ठ्यादे: स्वत्वादिवाचकत्वमावश्यकम् । कुत: ? **(1×10=10 Marks)**

III. प्रकरणं प्रदर्श्य **चतुर्णा**माशयं विशदयत ।

1) तस्य वस्तुमात्रसाधारण्येनार्थत एव लाभात् अनुपयोगाच्च ।
2) तत्रैकत्वस्याविवक्षया देवतापदस्य बहुवचनान्ततेति दिक् ।
3) अभेद एव वा विशेषणविभक्त्यर्थ: ।
4) तादृशधर्मस्तत्तद्व्यक्तित्वादिरूप एव ।
5) उक्तस्थले तादृश्या एकस्या अप्याकाङ्क्षाया विरहात् नापत्ति: ।
6) न हि कस्यचिद् गळ्यकृतो विपरीतलेखनं युक्तिबलात् वस्तुसिद्धौ बाधकम् । **($2\frac{1}{2}$×4=10 Marks)**

Placement paper, University exam paper, entrance exam and school question paper

http://www.howtoexam.com



IV. एकैकया खण्डिकया **द्वयो:** शब्दबोधप्रकारं लिखत ।

1) स्तोकं पचति ।

2) भूतले न घट: ।

3) वेदा: प्रमाणम् ।

4) राजपुरुष: । **(5×2=10 Marks)**

V. नामार्थयोरभेदान्वये व्युत्पत्तिं दर्शयत ।

**अथवा**

''प्रत्ययाश्च विभक्तिकृत् तद्धितादिभेदेन नानाविधा:'' – विशदयत । **(15×1=15 Marks)**

VI. पर्याप्त्याख्य: विलक्षणसम्बन्ध एव अप्रामाणिक इति मतं निरूपयत ।

**अथवा**

निपातातिरिक्त प्रातिपदिकार्थयो:, क्रियातादृशप्रातिपदिकार्थयोश्च भेदेन साक्षात् अन्वयबोधस्य अव्युत्पन्नत्वं विवृणुत । **(15×1=15 Marks)**

HowToExam.com

Placement paper, University exam paper, entrance exam and school question paper